**Reg. No. : ....................................**

**Name : .......................................**

**Code No. 5005**

**Second Year – March 2017**

Time : 2½ Hours
Cool-off time : 15 Minutes

Part – II

## SANSKRIT – SECOND LANGUAGE

Maximum : 80 Scores

***General Instructions to Candidates :***

- There is a 'cool-off time' of 15 minutes in addition to the writing time of 2½ hrs.
- You are not allowed to write your answers nor to discuss anything with others during the 'cool-off time'.
- Read questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.
- Electronic devices except non-programmable calculators are not allowed in the Examination Hall.

**निर्देशा** :

1. **सर्वे** प्रश्ना: समाधेया: ।
2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरत ?
3. प्रश्नानां वाचनाय **15** निमेषा: कल्पिता: ?

1. इष्टतमगीतं चित्वा आस्वादनटीकां लिखत ।

(क) त्यजति न पाणितलेन कपोलं

बालशशिनमिव सायमलीलम् ।।

(ख) हरिरिति हरिरिति जपति सकामं

विरहविहितमरणेव निकामम् ।।

(ग) श्रीजयदेवभणितमिति गीतं

सुखयतु केशवपदमुपनीतम् ।। **(Scores : 7)**

2. (क) एकेन वा द्वाभ्यां वा वाक्याभ्याम् उत्तरयत ।

प्रात: निर्झर्या: कलरवं श्रुत्वा, शाखामृगाणां लाङ्गूलान्दोलनं च दृष्ट्वा, शाखायां मन्दं मन्दम् आन्दोलयन्ती अहं व्याधस्य लक्ष्यमभवम् । वृक्षस्याध: कोटरवासी कश्चन सर्प: व्याधस्य पादयोरन्तरेण झटिति असरत् । विगलितलक्ष्यस्य व्याधस्य शरेण वृक्ष: विद्ध: । यद्यपि अहं रक्षिता, तथापि विषबाधित: अयं वृक्ष: क्रमेण नाशोन्मुख: अभवत् । एतं वृक्षं त्यक्त्वा मम बान्धवा: पक्षिणश्च सर्वे गता: । किन्तु, अहं कुत्रापि न गच्छामि ।

(1) शारिका केषां लाङ्गूलान्दोलनम् अपश्यत् ।

(2) वृक्ष: केन विद्ध: ।

(3) वृक्षं त्यक्त्वा के गता: । **(Scores : 6)**

(ख) (1) मम अनुजानां शब्दं श्रुत्वा एव नीडात् आगता । का ।

(शारिका, तापसी, अन्या) **(Score : 1)**

(2) तत्र एकस्यां शाखायां वृक्ष: तां दोलायितुं प्रचक्रमे । काम् ।

(शारिकाम्, तापसीम्, लताम्) **(Score : 1)**

3. (क) (1) अथ स वाल्मीकि: तमसानद्या: तीरे आश्रमे वासमारभत । तत्र एकदा स: शिष्येण सह नदीम् अगच्छत् । तदा एक: निषाद: तत्र आगत: । स तत्र स्थितस्य क्रौञ्चमिथुनस्य पुमासं क्रौञ्चम् अवधीत् । तत् दृष्ट्वा वाल्मीकि: अतीव दु:खित: अभवत् । स: क्रौञ्चमिथुनस्य पुंस: हन्तारं निषादं त्वं शाश्वती: समा: प्रतिष्ठां मा गम: इति शशाप । तत: स: आश्रमं च प्रत्यागत: । तदा समागतस्य ब्रह्मदेवस्य निर्देशानुसारं रामायणं रचयामास ।

वाल्मीके: रामायणरचनाया: एतद् दृश्यं पटकथारूपेण लिखत । **(Scores : 5)**

(2) प्रथमसंस्कृतचलच्चित्रस्य सङ्गीतं केन कृतम् ।

(एम्. बालमुरलीकृष्णा, येशुदास्, जि.वि.अय्यर्) **(Score : 1)**

4. (क) श्लोकं पठित्वा गद्यक्रमं पूरयत । **(Scores : 2)**

आत्मना बलवानेष ज्ञानपूर्णश्च बालक: ।

अवर्धत समं पित्रोरद्भुतानन्दशान्तिभि: ।।

आत्मना ________ बालक: बलवान् ________ च । ________ अद्भुतानन्दशान्तिभि: समं ________ ।

(ख) उदाहरणानुसारं योजयत ।

उदा. - राम: वनं गच्छति । तत: सुखं वसति । राम: वनं गत्वा सुखं वसति ।

कृष्ण: वृन्दावनं गच्छति । तत: क्रीडति । __________ । **(Scores : 2)**

5. (क) प्रादेशिकभाषाया अनुवदत ।

आत्मनाथवियोगात् व्रणितात्मा यशोधरा भूतकालस्मृतिषु व्यापृता अभवत् । तत्र भवान् छन्देन सहैव जनपदं द्रष्टुं प्रातिष्ठत । सायं प्रत्यागतः उद्यानस्य बिल्ववेदिकायां तूष्णीमुपाविशत् । तन्नेत्रे अर्धनिमीलिते आस्ताम् । किं जातम् । उच्यताम् । यशोधरे, अद्याहं लोकमपश्यम् । वार्धक्यं मरणं चापश्यम् । रोगं वेदनां चापश्यम् । **(Scores : 4)**

(ख) यशोधरा कुत्र व्यापृता आसीत् ।

(गृहकर्मसु, भूतकालस्मृतिषु, भगवत्पूजायाम्) **(Score : 1)**

6. (क) अरुविप्पुरमठस्य समीपे किम् आसीत् ।

(नदी, उद्यानम्, कदलीवनम्) **(Score : 1)**

(ख) समर्पितम् उपग्रहं प्रत्यग्रहीत् च । **(Score : 1)**

अत्र अव्ययपदं उद्धृत्य लिखत ।

(ग) तेषां हृदयेषु परिणतिम् उपानेतुम् उपदेश एव समर्थः, न दण्डः ।

सन्दर्भं विशदयत । **(Scores : 4)**

7. (क) सम्भाषणे रिक्तस्थानानि पूरयत ।

द्वि.छा. - केरले विद्यमानस्य रूपकाभिनयस्य कूटियाट्टस्य आस्वादने जनाः उत्सुकाः वा ।

आचार्यः- ________ । द्विसहस्रवर्षेभ्यः पूर्वम् आरब्धम् इदम् अद्यापि सजीवम् इत्येव अस्य वैशिष्ट्यम् । केरलेषु भारतेषु च न, विदेशेष्वपि संस्कृतनाट्योपयोगः अयं प्रसृतः इत्यपि श्रद्धेयमेव ।

तृ.छा. - विदेशीयानां ________ ।

आचार्यः - नाट्यसंकेतेषु अभिनये च भवति तेषां श्रद्धा । विदेशीयेषु विश्वविद्यालयेषु बहुत्र अनुसन्धानम् अपि कूटियाट्टमधिकृत्य प्रचलति । **(Scores : 4)**

(ख) कूटियाट्टे पूर्णतया अभिनीयमानम् एकं नाटकम् किम् ।

(अनर्घराघवम्, आश्चर्यचूडामणि:, अभिज्ञानशाकुन्तलम्) **(Score : 1)**

8. (क) खण्डिकां पठित्वा प्रदत्तेषु प्रश्नवाक्येषु त्रीण्युपयुज्य प्रश्नवाक्यानि लिखतु ।

अस्यां (पुर्याम्) धन्यस्थल्यां विराजमाने सूर्याय सङ्कल्पिते अलोकसामान्ये मन्दिरे आराधना न भवति । सप्तशतवर्षात् पूर्वं सफलीकृतमिदं शिलाकाव्यं स्तोत्राणि तथा अर्चनाश्च कथं असङ्गतानि अकरोत् । कोणार्कमार्गं प्रविष्टे एव वयं तस्य इतिहासस्य सङ्कीर्णखनीषु अवगाढा: भवाम: । ओडीषाया: भूस्थितिरस्माभि: नात्र अधिगम्यतेऽधुना, परं तु पुरावृत्तान्तानाम् आत्मार्पणानां च प्रकाशखण्डानि एव ।

(कस्याम्, कुत्र, किम्, कस्या:, केषाम्, के) **(Scores : 6)**

(ख) उदाहरणानुसारं विश्लेषयत ।

उदा. - हरि: + इव = हरिरिव

अधीतिरिति ___________ + ___________ । **(Score : 1)**

9. संगणकीयभाषाविज्ञानमधिकृत्य सूचनानुसारम् एकां खण्डिकां लिखत : **(Scores : 8)**

(**सूचना** : संगणकीयभाषाविज्ञानम्, वागभिज्ञानम्, स्वाभाविकभाषान्तरितं मुखम्, स्वाभाविकभाषाविश्लेषणम्, स्वाभाविकभाषाव्युत्पादनम्, वाणीसंश्लेषणम्, व्याकरणविधि:, सांख्यकीयविधि:, संयोजकपरिकल्पनम्)

10. (क) इष्यते चन्दनदासस्य जीवितम् । **(Scores : 5)**

इदं वाक्यं क: कं प्रति अवदत् । ससन्दर्भं विशदयत ।

(ख) चाणक्यस्य नामान्तरं किम् ।

(विष्णुगुप्तः, ब्रह्मगुप्तः, विष्णुमित्रः) **(Score : 1)**

11. (क) क्लैब्यं _______ स्म गमः पार्थ नैतत् _______ उपपद्यते ।

क्षुद्रं हृदयदौर्बल्यं _______ उत्तिष्ठ परन्तप ।।

(त्वयि, मा, त्यक्त्वा) **(Scores : 3)**

(ख) आयासनिवारणं केन गीताश्लोकेन निर्दिष्टम् - विचारयत । **(Scores : 4)**

12. संस्कृतभाषया अनुवदत ।

(1) വ്യക്തിത്വ വികാസവും യോഗംകൊണ്ടു സാധ്യമാണ്.

(2) യോഗസൂത്രങ്ങളുടെ രചയിതാവ് പതഞ്ജലി മഹർഷിയാകുന്നു.

(3) യോഗാനുശീലനംകൊണ്ടു ദേഹത്തിന്റെയും ഇന്ദ്രിയങ്ങളുടേയും മനസ്സിന്റെയും പ്രവർത്തന ക്ഷമത വർദ്ധിക്കുന്നു.

(1) Personality development is caused through controlling the mind.

(2) Sage Patanjali wrote Yogasutra.

(3) We can improve the power of sense organs and mind through practicing yoga.

**(Scores : 6)**

13. यथोचितं योजयत ।

| | | |
|---|---|---|
| मायादेवी | – | जयदेवः । |
| पद्मश्री माणिमाधवच्चाक्यार् स्मारकगुरुकुलम् | – | वृद्धसदनम् । |
| सालारम् | – | जोसफ् महाभागः । |
| तक्षकः | – | गौतमबुद्धः । |
| गीतगोविन्दम् | – | कूटियाट्टम् । |

**(Scores : 5)**